# Shri Devasena Sahasranamavalih

# श्रीदेवसेनासहस्रनामावलिः

## Document Information

Text title : Devasena Sahasranamavalih 1000 Names

File name : devasenAsahasranAmAvalI.itx

Category : sahasranAmAvalI, subrahmanya, nAmAvalI, devii, devI

Location : doc_subrahmanya

Transliterated by : derived from the stotra

Proofread by : PSA Easwaran

Description-comments : skAnde shaNkarasaMhitAtaH. See corresponding stotram.

Latest update : January 22, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 3, 2023

*sanskritdocuments.org*

# श्रीदेवसेनासहस्रनामावलिः

दकारादिथकारान्तवर्णादिमनामानि

ॐ श्रीगणेशाय नमः ।

ध्यानम् -
रक्ताभां रक्तवस्त्रां मणिमयखचितानेकभूषाबिरामां
देवीं माहेन्द्रमान्यां मधुरिपुनयनादुद्भवां देवसेनाम् ।
कल्हारं दक्षहस्ते तदितरकरवरं लम्बितं सन्दधानां
संस्थां स्कन्दस्य वामे समुदमपि गुहं लोकयन्तीं भजेऽहम् ॥

एवं ध्यात्वा समभ्यर्च्य मनसा सादरं नरः ।
पठेन्नामसहस्रं तत्स्तवराजमनुत्तमम् ।

ॐ देवराजतनयायै नमः । देववन्दितायै । देव्यै । देवीश्वर्यै ।
देववनितायै । देवतार्चितायै । देवरायै । देवराराध्यायै ।
देवमानसहंसिकायै । देवदारुवनान्तस्थायै । देवतायै । देवमोहिन्यै ।
देवारिविमुखायै । देवमुनीड्यायै । देवदेशिकायै । दैत्यारितनयायै ।
दैत्यकण्टक्यै । दैत्यमर्दिन्यै । दैव्यायै । दैन्यपराधीनायै नमः । २०

ॐ दैवज्ञायै नमः । दैव्यभक्षिण्यै । दोर्द्वयायै । दोषहीनाङ्ग्यै ।
दोषाभायै । दोर्धृताम्बुजायै । दोषाकरसमानास्यायै ।
दोषाकरसमर्चितायै । दोषघ्न्यै । दोर्लतायै । दोलचेलायै ।
दोलविहारिण्यै । दण्डिन्यै । दण्डनीतिस्थायै । दण्डायुधपतिव्रतायै ।
दण्डकारण्यनिलयायै । दण्डितासुरविक्रमायै । दक्षायै ।
दाक्षायणीप्रीतायै । दक्षिणायै नमः । ४०

ॐ दक्षिणाश्रितायै नमः । दक्षज्ञायै । दक्षिणावर्तकम्बुकण्ठ्यै ।
दयानिध्यै । दयामूर्त्यै । दरीदृश्यायै । दारीद्र्यभयनाशिन्यै ।
दशास्यन्दनसम्पूज्यायै । दशनाजितचन्द्रिकायै । दम्भायै ।

दम्भविहीनेड्यायै । दन्तिवक्त्रानुजप्रियायै । दात्र्यै ।
दानवदर्पघ्न्यै । दामोदरमनोहरायै । दिव्यायै । दिविषदीशानायै ।
दिविषत्पतिपूजितायै । दिव्यौघमण्डलायै । दिव्यमालिन्यै नमः । ६०

ॐ दिव्यविग्रहायै नमः । दिव्याम्बरधरायै । दीनरक्षिकायै ।
दीनकृन्नुतायै । दीक्षितायै । दीक्षिताराध्यायै । दीप्तायै ।
दीप्तविभूषणायै । दुष्टदूरायै । दुराराध्यायै । दुःस्वघ्न्यै ।
दुरितान्तक्यै । दूत्यै । दूतकुलाभीष्टायै । दूर्वासस्तुतवैभवायै ।
दूरदूरायै । दूरगन्त्र्यै । दूर्वादलसमप्रभायै । दृश्यायै ।
दृग्जलसम्भूतायै नमः । ८०

ॐ दृक्प्रदायै नमः । दृक्तमोऽपहायै । द्राविण्यै ।
द्राविडाधीशायै । द्रोणपूज्यायै । द्रुमाश्रितायै । धनदायै ।
धर्मिण्यै । धर्मविनुतायै । धर्मवर्धिन्यै । धात्र्यै ।
धात्रीफलप्रीतायै । धिषणाधिपपूजितायै । धिषणेश्यै ।
धीरनुतायै । धीरवादविलासिन्यै । धूम्रकेश्यै । धूपमोदायै ।
धूर्तघ्न्यै । धृतिमत्प्रियायै नमः । १००

ॐ ध्येयायै नमः । ध्येयातिगायै । धौम्यवसनायै ।
धौम्यपूजितायै । नम्यायै । नगोद्भवासूनुप्रियायै ।
नारायणात्मजायै । नारायणाक्षिजलजायै । नारायणगुरवे । नतायै ।
नट्यै । नदेश्वरानन्दायै । नन्दिन्यै । नन्दगोपमुदे । नित्यायै ।
नित्याश्रितायै । नित्यपतये । नित्यपतिव्रतायै । निरञ्जनायै ।
निराकारायै नमः । १२०

ॐ निर्विकारायै नमः । निरर्गलायै । नीहाराद्रिकृतावासायै ।
नीहाराद्रिसुतास्नुषायै । नीप्यायै । नीपसुमप्रीतायै । नूपुरारावकोमलायै ।
नूत्नायै । नूतनभूषाढ्यायै । न्यूनहीनायै । नरेडितायै ।
नौकारूढायै । नवरसायै । नववादित्रमेदुरायै । नववीरसमाराध्यायै ।
नवनागवरेश्वर्यै । नवग्रहवरायै । नव्यायै । नव्याम्भोजधरायै ।
निशायै नमः । १४०

ॐ पद्माक्ष्यै नमः । पद्मसङ्काशायै । पद्मजायै । पद्मभासुरायै ।
पराचलकृतोद्वाहायै । पराचलविहारिण्यै । पद्मनाभसुतायै ।
पद्मायै । पद्मिन्यै । पद्ममालिन्यै । पारिजातसुमप्रीतायै । पाशघ्न्यै ।

पापनाशिन्यै । पाठीनवाहसम्पूज्यायै । पार्वतीसुतकामिन्यै ।
पीनस्तन्यै । पीनपृष्ठायै । पुष्पकोमलायै । पुष्करायै ।
पुष्कराराध्यायै नमः । १६०

ॐ पुष्करक्षेत्रदेवतायै नमः । पुलिन्दिनीसपत्न्यै ।
पुरुहूतात्मसम्भवायै । पूज्यायै । पूतायै । पूतनारिविनुतायै ।
पूर्वगामिन्यै । पुष्टेन्दुनयनायै । पूर्णायै । पेशलायै ।
पेशलासनायै । फणाधरमणिप्रख्यायै । फणिराजसुपूजितायै ।
फुल्लपद्मधरायै । फुल्लदृष्ट्यै । फलनगाश्रितायै ।
भालनेत्रसुतानन्दायै । भालनेत्रप्रियङ्कर्यै । बलायै ।
बलारिजायै नमः । १८०

ॐ बालायै नमः । बालारिष्टविनाशिन्यै । बालखिल्यनुतायै ।
बाणाहस्तायै । बाणासुरान्तक्यै । बिम्बाधरायै । बिन्दुमध्यस्थितायै ।
बुधवरार्चितायै । बोधायनमुनिप्रीतायै । बोधदायै । बोधरूपिण्यै ।
बन्धूककुसुमप्रीतायै । बन्धूकसुमसन्निभायै । भामिन्यै । भारत्यै ।
भामायै । भास्करेन्दुसुपूजितायै । भीमायै । भीमेश्वर्यै ।
भूमायै नमः । २००

ॐ भूतिदायै नमः । भूपतिप्रियायै । भुवनेश्यै । भोगवत्यै ।
भोगदायै । भोगवर्धिन्यै । भोगिराजनुतायै । भोग्यायै ।
भीमसेनसमर्चितायै । भैम्यै । भेतालनटनरसिकायै ।
भीष्मसेवितायै । मन्त्रिण्यै । मन्त्रसारज्ञायै । मन्त्रवर्णाकृत्यै ।
मतये । मनुचक्रधरायै । मान्यायै । मणिमालविभूषितायै ।
मानिन्यै नमः । २२०

ॐ माधवसुतायै नमः । मधुप्रीतायै । मनस्विन्यै ।
मधुरालापमुदितगिरिजातनुजायै । मह्यै । मातृकावर्णसङ्क्लृप्तनवे ।
मान्धातृपूजितायै । महादेवस्नुषायै । मीनलोचनायै । मुक्तिदायिन्यै ।
मञ्जुकेश्यै । मञ्जुहासायै । मयूरवरवाहनायै । मारारातिस्नुषायै ।
मारसुखदायै । मणिमण्डनायै । मेषवाहायै । मेघवाहतनुजायै ।
मोहितप्रियायै । मरुत्सप्तकसंसेव्यायै नमः । २४०

ॐ मैनाकनिलयाश्रितायै नमः । यक्षिण्यै । यज्ञसम्भूतायै ।
यामिन्यै । यमलोद्भवायै । यन्त्रेश्वर्यै । यमाराध्यायै ।

यायजूकसमर्चितायै । यानारूढायै । यज्ञशीलायै ।
युवतये । यौवनार्चितायै । योगिन्यै । योगदायै । योग्यायै ।
योगीन्द्रकुलवन्दितायै । रक्षोहन्त्र्यै । रणत्पादनूपुरायै ।
राघवार्चितायै । रेणुकायै नमः । २६०

ॐ रणसन्नाहायै नमः । रणत्किङ्किणिमेखलायै । रावणान्तकर्यै ।
राज्यै । राजराजसमर्चितायै । रीम्बीजायै । रूपिण्यै । रूप्यायै ।
रमण्यै । रमणोत्सुकायै । रसायनकर्यै । राधायै । राधेय्यै ।
रथसंस्थितायै । रोहिणीशमुखायै । रोगहीनायै । रोगविनाशिन्यै ।
रोचनातिलकायै । रौद्र्यै । रौद्रमन्त्रविशारदायै नमः । २८०

ॐ लक्ष्मीपतिसुतायै नमः । लक्ष्म्यै । लम्बवामकराम्बुजायै ।
लम्पटायै । लकुल्यै । लीलायै । लोकालोकविहारिण्यै । लोकेश्वर्यै ।
लोकपूज्यायै । लताकारायै । ललत्कचायै । लोलम्बचेलायै ।
लोलाक्ष्यै । लघिमायै । लिकुचप्रियायै । लोभहीनायै । लब्धकामायै ।
लतानिलयसंस्थितायै । वनितायै । वनिताराध्यायै नमः । ३००

ॐ वन्द्यायै नमः । वन्दारुवत्सलायै । वामायै । वामस्थितायै ।
वाण्यै । वाक्प्रदायै । वारिजप्रियायै । वारिजासनसन्दृष्टमन्त्रायै ।
वाञ्छासुरद्रुमायै । विष्णुपत्न्यै । विषहरायै । वीणालापविनोदिन्यै ।
वेणिबन्धायै । वणुलोलायै । वेणुगोपालसुन्दर्यै । वाञ्छाकल्पलतायै ।
विश्ववन्दितायै । विश्वतोमुख्यै । विघ्नेशदेवरायै । वीशायै नमः । ३२०

ॐ वीशवाहायै नमः । विरोचिन्यै । वैरोचननुतायै । वैरिहीनायै ।
वीरेन्द्रवन्दितायै । विमानायै । विमनोदूरायै । विमानस्थायै ।
विराट्।प्रियायै । वज्रिण्यै । वज्रितनयायै । वज्रभूषायै ।
विधीडितायै । विशालाक्ष्यै । वीतशोकायै । वनस्थायै । वनदेवतायै ।
वारुण्यै । वनजारूढायै । वामायै नमः । ३४०

ॐ वामाङ्गसुन्दर्यै नमः । वल्लीसपत्न्यै । वामोरवे ।
वसिष्ठादिसुपूजितायै । शक्त्यै । शचीसुतायै । शक्तिधरायै ।
शाक्तेयकामिन्यै । श्यामायै । शाङ्करगायै । श्रीजायै । श्रियै ।
शिवमानसायै । शिवस्नुषायै । शुभाकारायै । शुद्धायै ।
शैलविहारिण्यै । शैलेन्द्रजाजानिजेष्टप्रदायै । शैलादिसन्नुतायै ।
शाम्भव्यै नमः । ३६०

ॐ शङ्करानन्दायै नमः । शङ्कर्यै । शशिशेखरायै ।
शारदायै । शारदाराध्यायै । शरजन्मसत्यै ।
शिवायै । षष्ठ्यै । षष्ठीश्वर्यै । षष्ठिदेव्यै ।
षष्ठ्यधिदेवतायै । षडाननप्रीतिकर्त्र्यै । षड्गुणायै ।
षण्मुखप्रियायै । षडाधारैकनिलयायै । षोढान्याशमयाकृतिः ।
षड्विधैक्यानुसन्धानप्रीतायै । षड्रसमिश्रितायै । साम्राज्ञ्यै ।
सकलायै नमः । ३८०

ॐ साध्व्यै नमः । समनीस्थानगायै । सत्यै । सङ्गीतरसिकायै ।
सारायै । सर्वाकरायै । सनातनायै । सनातनप्रियायै ।
सत्यायै । सत्यधर्मायै । सरस्वत्यै । सहस्रनामसम्पूज्यायै ।
सहस्रांशुसमप्रभायै । स्कन्दोत्साहकर्यै । स्कन्दवामोत्सङ्गनिवासिन्यै ।
सिंहवक्त्रान्तककर्यै । सिंहारूढायै । स्मिताननायै । स्वर्गस्थायै ।
सुरसम्पूज्यायै नमः । ४००

ॐ सुन्दर्यै नमः । सुदत्यै । सुरायै । सुरेश्वर्यै ।
सुराचार्यपूजितायै । सुकृतीडितायै । सुरद्रुनिलयायै ।
सौरमण्डलस्थायै । सुखप्रदायै । सौदामिनीनिभायै । सुभ्रुवे ।
सौन्दर्यचितहृत्प्रियायै । सुरद्रुहासुहृदे । सोमयाजिपूज्यायै ।
सुमार्चितायै । सुमेषुवरदायै । सौम्यायै । स्कन्दान्तःपुरवासिन्यै ।
स्कन्दकोष्ठगतायै । स्कन्दवामभागस्थितायै नमः । ४२०

ॐ समायै नमः । स्कन्दाश्लिष्टायै । स्कन्ददृष्ट्यै ।
स्कन्दायत्तमनस्विन्यै । सनकादिहितायै । साङ्गायै । सायुधायै ।
सुरवंशजायै । सुरवल्ल्यै । सुरलतायै । सुरलोकनिवासिन्यै ।
सुब्रह्मण्यसख्यै । सेनायै । सोमवंश्यनृपेडितायै । सुतप्रदायै ।
सूतवायुः । सुरसैन्यसुरक्षिकायै । सर्वाधारायै । सर्वभूषायै ।
सर्वेश्यै नमः । ४४०

ॐ सर्वपूजितायै नमः । सरसायै । सादरायै । सामायै ।
स्वामिन्यै । स्वामिमोहिन्यै । स्वाम्यद्रिनिलयायै । स्वच्छायै ।
स्वतन्त्रायै । स्वस्तिदायै । स्वधायै । स्वाहाकृतिः ।
स्वादुशीलायै । स्वरप्रस्तारवित्तमायै । हरस्नुषायै ।
हरानन्दायै । हरिनेत्रसमुद्भवायै । हरिणाक्ष्यै । हरिप्रेमायै ।

हरिदश्वविवर्धितायै नमः । ४६०

ॐ हरसूनुप्रियायै नमः । हरभासुरायै । हीरभूषणायै ।
हेमाम्बुजधरायै । हेमकाञ्च्यै । हेमाब्जसंस्थितायै । हेमाद्रिनिलयायै ।
हेलामुदितायै । स्वप्रकामिन्यै । हेरम्बदेवरायै । होमप्रियायै ।
होत्र्यै । हिरण्यदायै । हिरण्यगर्भोपज्ञातमन्त्रायै । हानिविवर्जितायै ।
हिमाचलस्थितायै । हन्त्र्यै । हर्यक्षासनसंस्थितायै । हंसवाहायै ।
हंसगतये नमः । ४८०

ॐ हंस्यै नमः । हंसमनुप्रियायै । हस्तपद्मायै । हस्तयुगायै ।
हसितायै । हसिताननायै । हृद्यायै । हृन्मोहसंहर्त्र्यै ।
हृदयस्थायै । हतासुरायै । हाकिन्यै । हाकिनीपूज्यायै । हितायै ।
हितकर्यै । हरायै । हरिद्रामुदितायै । हर्म्यसंस्थायै ।
हलधरेडितायै । हालाहलप्रशमन्यै । हलकृष्टजगत्त्रयायै नमः । ५००

ॐ हल्लीसमुदितायै नमः । हेयवर्जितायै । हरकोमलायै । क्षमायै ।
क्षमाकर्यै । क्षाममध्यायै । क्षामविनाशिन्यै । क्षामादिविनुतायै ।
क्षिप्रायै । क्षणिकाचलसंस्थितायै । क्षपेशतुल्यवदनायै ।
क्षपाचरविनाशिन्यै । क्षिप्रसिद्धिप्रदायै । क्षेमकारिण्यै ।
क्षेत्ररूपिण्यै । क्षेत्रेश्वर्यै । क्षेत्रपालपूजितायै ।
क्षुद्रनाशिन्यै । क्षुद्रग्रहार्तिशमन्यै । क्षौद्रायै नमः । ५२०

ॐ क्षौद्राम्बरावृतायै नमः । क्षीरान्नरसिकायै । क्षीरायै ।
क्षुद्रघण्टायै । क्षितीश्वर्यै । क्षितीशविनुतायै । क्षत्रायै ।
क्षत्रमण्डलवन्दितायै । क्षयहीनायै । क्षयव्याधिनाशिन्यै ।
क्षमणापहायै । क्षराक्षरायै । क्षतारातिमण्डलायै । क्षिप्रगामिन्यै ।
क्षणदायै । क्षणदाराध्यायै । क्षणदा । कुटिलालकायै ।
क्षीणदोषायै । क्षितिरुहायै नमः । ५४०

ॐ क्षितितत्त्वायै नमः । क्षमामय्यै । अमरायै । अमराधीशतनयायै ।
अपराजितायै । अपारकरुणायै । अद्वैतायै । अन्नदायै । अन्नेश्वर्यै ।
अजायै । अजारूढायै । अजाराध्यायै । अर्जुनाराधितायै । अजरायै ।
अरिष्टशमन्यै । अच्छायै । अद्भुतायै । अमृतेश्वर्यै ।
अमृताब्धिकृतावासायै । अमृतासारशीतलायै नमः । ५६०

ॐ अमृतानन्दितायै नमः । अनादये । अमृतायै । अमृतोद्भवायै ।

अनादिमध्यावधये । अनौपम्यगुणाश्रितायै । आधारहीनायै । आधारायै ।
आधाराधेयवर्जितायै । आदित्यमण्डलान्तस्थायै । आश्रिताखिलसिद्धिदायै ।
आशुमोहितषड्वक्त्रायै । आशापालसुपूजितायै । आरग्वधप्रियायै ।
आरार्तिमुदितायै । आचरशालिन्यै । आयुःप्रदायै । आरोग्यकर्त्र्यै ।
आरध्यायै । आहारभक्षिण्यै नमः । ५८०

ॐ इन्द्रसेनायै नमः । इन्द्रनुतायै । इन्द्रावरजसम्भवायै ।
इन्दिरारमणप्रीतायै । इन्द्राणीकृतलालनायै । इन्दीवराक्ष्यै ।
इन्द्राक्ष्यै । इरम्मदसमप्रभायै । इतिहासश्रुतकथायै । इष्टायै ।
इष्टार्थदायिन्यै । इक्ष्वाकुवंश्यसम्पूज्यायै । इज्याशीलवरप्रदायै ।
ईश्वर्यै । ईशातनयगृहिण्यै । ईश्वरप्रियायै । ईतिबाधाहरायै ।
ईड्यायै । ईषणारहिताश्रितायै । उमासुतप्रियायै नमः । ६००

ॐ उद्यद्रवितुल्यायै नमः । उमाप्रियायै । उदारायै । उद्यमायै ।
उद्यत्किरणायै । उरुविक्रमायै । उरुप्रभावायै । उर्वीभृन्निलयायै ।
उडुगणाश्रितायै । ऊरुन्यस्तकरायै । ऊर्ध्वलोकस्थायै । ऊर्ध्वगामिन्यै ।
ऋद्धिदायै । ऋद्धविनुतायै । ऋणहन्त्र्यै । ऋजुप्रियायै ।
एणाङ्कशेखरसुतगाढाश्लिष्टवपुर्धरायै । एणाक्ष्यै । एणमुदितायै ।
ऐरम्मदसमाम्बरायै नमः । ६२०

ॐ ओषधिप्रस्थनिलयायै नमः । ओषधीशानसेवितायै । ओमीश्वर्यै ।
औपलाम्बायै । औत्सुक्यवरदायिन्यै । औदार्यशीलायै । अम्बोत्किमुदितायै ।
आपन्निवरिण्यै । कञ्जाक्ष्यै । कञ्जविनुतायै । कम्बुकण्ठ्यै ।
कविप्रियायै । कमलायै । कमलाराध्यायै । कनत्कनकविग्रिहायै ।
कामिन्यै । कामविनुतायै । कामारातियुतप्रियायै । कामाङ्गनेडितायै ।
काम्यायै नमः । ६४०

ॐ कामलोलायै नमः । कलावत्यै । काङ्क्षाहीनायै । कामकलायै ।
किंशुकाभरदच्छदायै । कलायै । कुवलयानन्दायै ।
कुरुविन्दमणिप्रभायै । कुक्कुटध्वानमुदितायै । कुक्कुटध्वजकोमलायै ।
कूर्मासनगतायै । कूर्मपृष्ठाभप्रपदान्वितायै ।
कृत्तिकातनयप्रीतायै । कृत्तिकामण्डलावृतायै । कृत्तिकाभप्रियायै ।
कृत्तिधरायै । केदारवासिन्यै । केवलायै । केवलानन्दायै ।
केकिमोदायै नमः । ६६०

ॐ करद्वयायै नमः । केकिवाहायै । केशवेष्टायै ।
कैलासाचलवालसिन्यै । कैवल्यदात्र्यै । कैवल्यायै । कोमलायै ।
कोमलाकृत्यै । कोणस्थायै । कोपविमुखायै । कौण्डिन्यमुनिपूजितायै ।
कृपापूर्णायै । कृपालोकायै । कृपाचार्यसमर्चितायै ।
कृतान्ताभयदायै । कृष्णनुतायै । कृष्णाजिनासनायै । कलिहन्त्र्यै ।
कलीशान्यै । कलिकल्मषनाशिन्यै नमः । ६८०

ॐ कवेरतनयातीरवासिन्यै नमः । कमलासनायै । खड्गहस्तायै ।
खाद्यलोलायै । खण्डितारातिमण्डलायै । गण्यायै । गणप्रियायै ।
गद्यायै । पद्यायै । गणनवर्जितायै । गणेशावरजप्रेमायै ।
गणिकामण्डलोत्सुकायै । गणेशाराधनोद्युक्तायै । गायत्र्यै ।
गानलोलुपायै । गाथानेकायै । गालवार्च्यायै । गाङ्गेयसुमनोहरायै ।
गाङ्गेयालिङ्गिततनवे । गाङ्गेयपरमोत्सुकायै नमः । ७००

ॐ गिरिगम्यायै नमः । गिरिनुतायै । गिरीशायै । गिरिशास्नुषायै ।
गिरिजाजानिजजायायै । गिरिसौधायै । गिरिस्थितायै । गीर्वाणविनुतायै ।
गीतायै । गीतगन्धर्वमण्डलायै । गीर्वाणेशतपोलब्धायै ।
गीर्वाण्यै । गीष्पतीडितायै । गुह्यायै । गुह्यतमायै । गुण्यायै ।
गुह्यकादिसमर्चितायै । गुरुप्रियायै । गूढगतये । गुहानन्दायै नमः । ७२०

ॐ गुहप्रियायै नमः । गुहेष्टायै । गुहसम्मोहायै । गुहानन्यायै ।
गुहोत्सुकायै । गुहश्रीर्गुहसारज्ञायै । गुहाश्लिष्टकलोवरायै ।
गूढायै । गूढतमायै । गूढविद्यायै । गोविन्दसम्भवायै ।
गोविन्दसहजासूनुकलत्राय । गोपिकानुतायै । गोपालसुन्दर्यै । गोपनुतायै ।
गोकुलनायिकायै । गोत्रभित्तनयायै । गोत्रायै । गोत्रज्ञायै ।
गोपतिस्थितायै नमः । ७४०

ॐ गौरव्यै नमः । गौरवर्णाङ्ग्यै । गौर्यै । गौर्यर्चनप्रियायै ।
गण्डकीतीरगायै । गण्डभेरुण्डायै । गण्डभैरव्यै । गण्डमालायै ।
गण्डभूषायै । गण्डमाङ्गल्यभूषणायै । घटार्गलायै ।
घटरवायै । घटतुल्यस्तनद्वयायै । घटनारहितायै । घण्टामणये ।
घण्टारवप्रियायै । घटिकायै । घटिकाशून्यायै । घृणापूर्णायै ।
घृणिप्रियायै नमः । ७६०

ॐ घटोद्भवमुनिस्तुत्यायै नमः । घुटिकासिद्धिदायिन्यै । घूर्णाक्ष्यै ।

घृतकाठिन्यायै । घृतसूक्तानुवादितायै । घृताहुतिप्रियायै ।
घृष्टये । घृष्टकर्त्र्यै । घृणानिधये । घोरकृत्यायै ।
घोरकृत्यविमुखायै । घनमूर्धजायै । चञ्चलायै । चपलायै ।
चण्डायै । चतुलायै । चतुलेक्षणायै । चण्डप्रचण्डायै ।
चण्डीशायै । चरचरविनोदिन्यै नमः । ७८०

ॐ चतुरायै नमः । चतुरश्राङ्कचक्रायै । चक्रधरात्मजायै ।
चक्रिण्यै । चक्रकबर्यै । चक्रवर्तिसमर्चितायै । चन्द्रकाशायै
षुग्ग् चन्द्रकान्त्यै । चन्द्रमुख्यै । चन्द्रहासायै । चमत्कृतायै ।
चन्द्रहासधरायै । चक्रवाकस्तनभुजान्तरायै । चक्रवालस्थितायै ।
चक्रगतये । चन्दनचर्चितायै । चारुभूषायै । चारुमुख्यै ।
चारुकान्त्यै । चरुप्रियायै । चार्वाकदूरगायै नमः । ८००

ॐ चापधरायै नमः । चाम्पेयगन्धिन्यै । चित्रायै ।
चित्ररथायै । चिन्त्यायै । चिरन्तनायै । चीनाम्बरायै ।
चीनदेश्यायै । चिदम्बरविहारिण्यै । चिकुरायै । चिकुराबद्धायै ।
चिरञ्जीवित्वदायिन्यै । चिन्तितार्थप्रदायै । चिन्तनीयायै ।
चिन्तामणीश्वर्यै । चिन्तामणिमयाकल्पायै । चिन्मय्यै । चिन्तितायै ।
चित्यै । च्युतिहीनायै नमः । ८२०

ॐ चूतकुञ्जायै नमः । चोरघ्न्यै । चोरनाशिन्यै ।
चतुराननसम्पूज्यायै । चामरग्राहिणीवृतायै । चक्षुष्मत्यै ।
चक्षूरोगहारिण्यै । चणकप्रियायै । चण्डीसूनुमनःप्रीतिकारिण्यै ।
चूर्णकुन्तलायै । चूर्णप्रियायै । चलच्चेलायै ।
चारुक्वणितकङ्कणायै । चामीकरप्रभायै । चामीकरभैरवमोहिन्यै ।
चामीकराद्रिनिलयायै । चातुर्योक्तिजितप्रियायै । चत्वरायै ।
चत्वरगत्यै । चतुर्विधपुमर्थदायै नमः । ८४०

ॐ छत्रिण्यै नमः । छत्रवीरेन्द्रायै । छविदीप्तदिगन्तरायै ।
छायाहीनायै । छविछ(छि)न्नायै । छविकर्त्र्यै । छवीश्वर्यै ।
छादितारातिनिवहायै । छायापतिमुखार्चितायै । छेत्र्यै ।
छेदितदिङ्नागायै । छेदहीनपदस्थितायै । जयायै । जयकर्यै ।
जन्यायै । जनिहीनायै । जनार्चितायै । जयन्तसहजायै ।
जम्भभेदिगोत्रसमुद्भवायै । जह्नुकन्यासुतप्रेमायै नमः । ८६०

ॐ जह्नुजातीरवासिन्यै नमः । जटाधरसुतानन्दायै । जटाहीनायै ।
जटात्रयायै । जरामरणनिर्मुक्तायै । जगतानन्ददायिन्यै ।
जनार्दनसुतायै । जन्यहीनायै । जलधरासनायै । जलाधारायै ।
जपपरायै । जपापुष्पसमाकृतये । जाह्नवीपुलिनोत्साहायै ।
जाह्नवीतोयमोदिन्यै । जानकीरमणप्रीतायै । जातकर्मविशारदायै ।
जातकाभीष्टदायै । जातिहीनायै । जात्यन्धमोचिन्यै ।
जिताखिलेन्द्रियग्रामायै नमः । ८८०

ॐ जितारये नमः । जितकामिन्यै । जितामित्रायै । जितजगते । जिनदूरायै ।
जिनार्चितायै । जीर्णायै । जीरकनासाग्रायै । जीवनायै । जीवनप्रदायै ।
जीवलोकेष्टवरदायै । जीवायै । जीवा(व)रसप्रियायै । जुष्टायै ।
जुष्टप्रियायै । जुष्टहृदयायै । ज्वरनाशिन्यै । ज्वलत्प्रभावत्यै ।
ज्योत्स्नायै । ज्योत्स्नामण्डलमध्यगायै नमः । ९००

ॐ जयदायै नमः । जनजाड्यापहारिण्यै । जन्तुतापहायै ।
जगद्धितायै । जगत्पूज्यायै । जगज्जीवायै । जनाश्रितायै ।
जलजस्थायै । जलोत्पन्नायै । जलजाभविलोचनायै । जपाधरायै ।
जयानन्दायै । जम्भभिद्वनितानुतायै । झल्लरीवाद्यायै ।
सुप्रीतायै । झञ्झावातादिभीतिहायै । झर्झरीकृतदैत्यौघायै ।
झारिताशेषपातकायै । ज्ञानेश्वर्यै । ज्ञानदात्र्यै नमः । ९२०

ॐ ज्ञातलोकान्तरस्थित्यै नमः । ज्ञानगम्यायै ।
ज्ञाततत्त्वायै । ज्ञानज्ञेयादिशून्यगायै । ज्ञेयायै ।
ज्ञातिविनिर्मुक्तायै । ज्ञातकान्तान्तराशयायै । टङ्कायुधधरायै ।
टङ्कटम्भोलिहतदानवायै । टङ्कितारिवलपापौघायै । टीकाकर्त्र्यै ।
ठमात्मिकायै । ठमण्डलायै । ठक्कुराच्र्यायै । ठक्कुरोपाधिनाशिन्यै ।
डम्भहीनायै । डामरीड्यायै । डिम्भदायै । डमरुप्रियायै ।
डाकिन्यै नमः । ९४०

ॐ डाकिनीसेव्यायै नमः । डित्थेश्यै । डिण्डिमप्रियायै ।
डिण्डिमारावमुदितायै । डबित्थमृगवाहनायै ।
डङ्गार्यै । डुण्डुमारावायै । डल्लक्यै । डोरसूत्रभृते ।
ढक्कावद्यधरायै । धक्कारावनिष्ठ्यूतदिक्तटायै ।
ढुण्ढिराजानुजप्रीतायै । ढुण्ढिविघ्नेशदेवरायै । डोलाकेलिकरायै ।

डोलाविहारोत्सृष्टकन्दुकायै । णकारबिन्दुवामस्थायै ।
णकारज्ञाननिर्णयायै । णकारजलजोद्भूतायै । णकारस्वरवादिन्यै ।
तन्व्यै नमः । ९६०

ॐ तनुलताभोगायै नमः । तनुश्यामायै । तमालभायै । तरुण्यै ।
तरुणादित्यवर्णायै । तत्त्वातिशायिन्यै । तपोलभ्यायै । तपोलोकपूज्यायै ।
तन्त्रीविदूषिण्यै । तात्पर्यावधिकायै । तारायै । तारकान्तककामिन्यै ।
तारेश्यै । तारिण्यै । तिर्यक्सूत्रिण्यै । त्रिदशाधिपायै ।
त्रिदशाधिपसम्पूज्यायै । त्रिनेत्रायै । त्रिविधायै । त्रय्यै नमः । ९८०

ॐ तिल्वाटवीगतायै नमः । तुल्यहीनायै । तुम्बुरुवन्दितायै ।
तुराषाड्भम्भवायै । तुर्यायै । तुषाराचलवासिन्यै । तुष्टायै ।
तुष्टिप्रदायै । तूर्णायै । तूर्णध्वस्ताखिलामयायै । त्रेतायै ।
त्रेताग्निमध्यस्थायै । त्रय्यन्तोद्गीतवैभवायै । तोत्रभृते ।
वीरसंसेव्यायै । स्थित्यै । सर्गादिकारिण्यै । सर्वार्थदात्र्यै ।
प्रकृतिषष्ठांशायै । परमेश्वर्यै नमः । १०००

ॐ वस्वादिगणसम्पूज्यायै नमः । ब्रह्ममानसपुत्रिकायै ।
सरिलान्तर्भ्राजमानायै । स्वर्णरम्भग्रहार्चितायै । ब्रह्मज्योतिषे ।
ब्रह्मपत्न्यै । विद्यायै । श्रियै । परदेवतायै नमः । १००९

इति श्रीमद्स्कान्दे शङ्करसंहितातः
श्रीदेवसेनासहस्रनामावलिः सम्पूर्णा ॥

Proofread by PSA Easwaran

*Shri Devasena Sahasranamavalih*

pdf was typeset on February 3, 2023

Please send corrections to *sanskrit@cheerful.com*